National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2016; 1(5): 89-90
© 2016 NJHSR
www.sanskritarticle.com

Dr. Krishneshwar Jha
Asst. Professor, Dept. Of Jyotisha,
Rashtriya Sanskrit Vidyapeetha,
Tirupati

Correspondence:
Dr. Krishneshwar Jha
Asst. Professor, Dept. Of Jyotisha,
Rashtriya Sanskrit Vidyapeetha,
Tirupati

# कालानुरोधेनजातकफलम्

**Dr. Krishneshwar Jha**

**जात: प्रत्युषसि स्वधर्मनिरतः सत्कर्मजीवी सुखी**
**मध्याह्ने यदि राजतुल्यगुणवाञ् जातोऽपराह्ले धनी।**
**सायंकालभवः सुगन्धवनितालोल: खलात्माऽटनो**
**रात्रौ तत्फलमेव सौख्यबहुल: सूर्योदये जायते॥**

प्रात: काले जातकस्य जन्मंभवेत तदा जातकः धर्मयुक्तः सत्यकर्मजीवनेयुक्ताः, सुखी भवेत। मध्याह्ने जन्मभवेत तथा राज्यतुल्यगुणयुक्तः अपराह्ने जन्मंभवेत तदा धनयुक्त वा धनवानभवेत। सायंकाले उत्पन्न जातक : सुगंधयुक्तः एवं स्त्री स्नेह- युक्तः विचलीतात्मा भ्रमणशिल: भवेत। रात्रौ जन्मयुक्त जातकः, सुन्दरवासनायुक्तः स्त्रीप्रेमयुक्ताः खिन्नमनस्कयुक्ताः भ्रमणशीलाः भवति। सूर्योदयकाले जन्म-जातकः सर्वेषुगुणेनयुक्त सर्वसम्पन्न सौरख्येण युक्ताः भवन्ति।

**वलक्षपक्षे यदि पुत्रपौत्रधनाधिको धर्मरतः कृपालुः।**
**स्वकार्यवादी निजमातृभक्तः स्वबन्धुवैरी यदि कृष्णपक्षे॥**

शुक्लपक्षे जन्मजातक: बहुपुत्र-पौत्र- धनेनयुक्तः धर्मानुरागीण: कृपालुश्च भवति।

**कृष्णपक्षे उत्पन्नजातकः**

स्वकार्येषु वाद-विवादयुक्ताः, स्वमातृभक्तिगुणेषु युक्तः स्वपरिवारस्यशत्रवः भवन्ति।

**उत्तरायणसमुद्भवः पुमान ज्ञानयोगनिरतश्च नैष्ठिकः।**
**दक्षिणायनभवः प्रगल्भवाग् भेदबुद्धिरभिमानतत्परः॥**

सौम्यायने (मकरादिराशिषटके) उत्पन्न जातकः ज्ञानयोगेनिरता नैष्ठिकगुणेन युक्ताः भवन्ति। दक्षिणायने (कर्कादिराशिषटके) जन्मजातः मानव: चतुरवक्ता: तीक्ष्णबुद्धियुक्ता: अभिमानयुक्ताश्च भवन्ति।

**दीर्घायु धनिको बसन्तसमये जातः सुगन्धप्रियो,**
**ग्रीष्मतौ धनतोयसेव्यचतुरो भोगी कृशाङ्ग, सुधीः।**
**क्षारक्षीर कटुप्रियः सुवचनो वर्षर्तुज: स्वच्छधीः,**
**पुण्यात्मा सुमुख: सुखी यदि शरत्कालोद्भवः कामुक:॥**
**योगी कृशाङ्ग कृषकश्च भोगी हेमन्तकालप्रभवः समर्थः।**
**स्नानक्रिया दानरतः स्वधर्मी मानी यशस्वी शिशिरर्तुज: स्यात॥**

अर्थात- बसन्त ऋतुकाले उत्पन्न जातकः दीर्घायु, धनेनयुक्ताः सुगन्धवासनाप्रिय भवेत। एवमेव ग्रीष्मऋतोत्पन्न जातक: बहुजलसेवीन: चतुरः, भोगी, कृशतनु ज्ञानीनश्च भवेत।

वर्षाऋतुषुजायमानः जातक: लवन: - क्षीरः- कटु (तिक्त) प्रदार्थप्रियः सुवचनयुक्तः, स्वच्छबुद्धियुक्तः शुशिल भवेत।

शरदऋतुषु उत्पन्न मानव: पुण्यात्माः, सुखीः, सुमुखीः, कामीश्चः भवति। हेमन्तऋतुः जायमान: जातक: योगीः, कृशतनुः, कृषकः भोगीः, समर्थश्च भवेत। शिशिरऋतु जायमाने मानवः स्नान-क्रिया-दानेनरताः, स्वधर्मीः मानीः यशस्वीश्च भवेत।

**चैत्रे सर्वकलागमश्रुति परो नित्योत्सवः श्रीरतो**
**वैशाखे यदि सर्वशास्त्रकुशलः स्वातन्त्रिको भूपतिः।**
**ज्येष्ठे मासि चिरायुरर्थतनयी मन्त्रक्रियाकोविद-**
**श्चाषाढेऽतिधनी कृपालुरनिशं भोगी परद्वेषकः।**
**जातः श्रावणमासि देव धरणीदेवार्चने तत्परो**
**नानादेशरतश्च भाद्रपदजस्तन्त्री मनोराज्यवान्**
**मासे चाश्वयुजि स्वकीयजनविद्वेषी दरिद्रश्चलः**
**पुष्टाङ्गः कृषको विशालनयनो वित्ताधिक: कार्तिके।**
**सुरगुरुपितृभक्तो मार्गशीर्षे च धर्मी**
**धनगुणबलशाली तुङ्गनासस्तु पुष्ये।**
**खलमतिरतिधर्माचारवान माघमासि**
**प्रतिदिनमुपकर्त्ता फाल्गुने गानलोलः॥**

अर्थात-: चैत्रमासे उत्पन्न जातकः सर्वेषुकलाः-
आगम: - वेदादिश्च ज्ञातारः भवन्ति। सर्वदा उत्सवेषुयुक्ताः लक्ष्मीरताश्च भवेत।

वैशाखे लब्धजन्मान सर्वशास्त्रेषुकुशलाः स्वातन्त्रश्च भवति। नृपाऽपि भवति।

ज्येष्ठमासे उत्पन्न जातकः दीर्घायुः, धनवानः, पुत्रवानः, मन्त्र-क्रियादयः ज्ञातारः भवन्ति। आषाढमासे लब्धजन्मानः पूर्णधनयुक्ताः, कृपालव: अहर्निशं भोगीः, परेषांवैरिविचार-युक्ताः भवेत।

श्रावणमासे जन्मजातक: भूमिदेव: (ब्राह्मणः) एवमेव देवतायाः पूँजायां संलग्नाः भवन्ति। भाद्रपदे जन्ममानः विभिन्नदेशेषुरता : तन्त्रीः, मनोराज्यवान भवेत। आश्विमासे प्राप्तजन्म: जातकः स्वजनानां वैरी: दरिद्रः, चंचल भवेत।

कार्तिकमासे लब्धजन्मान: पुष्टाङ्गः कृषकः, विशालनेत्रः, बहुधनयुक्ताश्च भवेत।

मार्गशीर्षमासे प्राप्तजन्म: देवता:- गुरुः पितृभक्तः धर्मात्माश्च भवेत। पौषेषुजन्म जातक: धन-गुण-बलेनसुक्ताः उन्नतनासिका युक्तश्च भवेत। माघमासेजन्म जातक: खलबुद्धिः युक्तः विशेषधर्मयुक्तः धर्मकार्य- करतारः भवेत। फाल्गुन मासे लब्धजन्मान: प्रतिदिनं अन्येषां उपकारः करतारः गानेषु चतुरः भवेत।

**मानी पिङ्गल केशलोचनतनुश्चादित्यवारे विभुः**
**कामी कान्तवपुर्द्दयालुरनिशं शीतांशुवारोद्भव:।**
**क्रूरः साहसवादकार्यनिरतो भूसुनुवारे सदा**
**देवब्राह्मणपूजकः सुवचन सौम्यस्य वारोदये।**
**यज्वा भूपतिवल्लभश्च गुणवान् ख्यातो गुरोर्वासरे**
**धान्यक्षेत्रधनाश्रितः सितदिने सर्वप्रियः कामधीः।**
**मन्दप्रायमतिः परान्नधनभुग् वादप्रवादान्वितो**
**द्वेषी बन्धुजनावरोधकुशलो मन्दस्य वारोद्भव:**

अर्थात:- रविवासरे जन्मलब्धमानः जातकः स्वाभिमानीः, पिंगलबालः, नेत्रः, शरीरयुक्तः, सामर्थ्यवान भवेत। चन्द्रवासरेजायमानाः जातक: कामीः, कान्तिमानशरीरयुक्तः, अहर्निशं दयायुक्तः भवति। मंगलवासरे उत्पन्न जातकः, क्रूर प्रवृतयः, सर्वदासाहस युक्तः, कार्यपरायणश्च भवेत। बुधवासरे उत्पन्न जातक: देव – ब्राह्मणां पूँजा- अर्चनाकुर्वानः सुवचनयुक्तः वक्ताश्च भवेत।

गुरुवासरे जायमानः जातक: यज्ञकतारः राजवल्लभः, गुणवानः, विख्यातश्च भवेत। शुक्रवासरे लब्धजन्मानः जातकः, धान्यः- क्षेत्रः- धनाश्रितः, सर्वप्रियः, कामबुद्धि युक्ताश्च भवति। शनिवासरे उत्पन्न जातकः प्रायः मन्दबुद्धि, परान्न-धनयुक्ताः वादप्रवादेषुयुक्ताः वैरीन: वन्धुजनानां कार्येषु अवरोधकाश्च भवन्ति।

एवं प्रकारण वक्तुंशक्यते यत प्रत्यक्ष कालानुरूपेण वा समयानुसारेण मास:- ऋतु: - दिवस :- अयनादि प्रत्यक्ष ज्ञातकालानुसारेण जातकस्य ज्योतिष नियमानुसारेण जीवन विषयक ज्ञानस्य परिकल्पना करतुंशक्यते वा ज्ञातुं शक्यते। इयंमेव ज्योतिष शात्रस्य प्रत्यक्षं प्रामाणानि सास्त्राऽतरगंत ज्ञायते।

अर्थात ज्ञानेन अज्ञानस्य ज्ञानं प्राप्यते, जातकस्य सम्पूर्ण जीवन विषयक विषयानांऽपि ज्ञानं प्राप्यते।